# Shri Bagalamukhi Stavarajah

# શ્રીબગલામુખીસ્તવરાજઃ

## Document Information

```
Text title : Shri Bagalamukhi Stavaraja
File name : bagalAmukhIstavarAjaH.itx
Category : devii, dashamahAvidyA, stavarAja
Location : doc_devii
Proofread by : PSA Easwaran
Latest update : May 9, 2020
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીબગલામુખીસ્તવરાજઃ

વન્દે સકલસન્દેહદાવપાવકમીશ્વરમ્ ।
કરુણાવરુણાવાસં ભક્તકલ્પતરું ગુરુમ્ ॥ ૧॥

ઉલ્લસત્પીતવિદ્યોતિ વિદ્યોતિત તનુત્રયમ્ ।
નિગમાગમસર્વસ્વમીડેઽહં તન્મહન્મહઃ ॥ ૨॥

ૐ પૂર્વં સ્થિરમાયાં ચ બગલામુખી સર્વતઃ ।
દુષ્ટાનાં વાચમુચ્ચાર્ય મુખં પદં તથોદ્ધરેત્ ॥ ૩॥

સ્તમ્ભયેતિ તતો જિહ્વાં કીલયેતિ સમુદ્ધરેત્ ।
બુદ્ધિં વિનાશયેતિ પદં સ્થિરમાયામનુસ્મરેત્ ॥ ૪॥

પ્રણવં વહ્નિજાયા ચેત્યેવ પૈતામ્બરો મનુઃ ।
પાતુ માં સર્વદા સર્વં નિગ્રહાનુગ્રહક્ષમઃ ॥ ૫॥

કણ્ઠં નારદ ઋષિઃ પાતુ પઙ્ક્તિછન્દોઽવતાન્મુખમ્ ।
પીતામ્બરા દેવતા તુ હૃન્મધ્યમવતાન્મમ ॥ ૬॥

હલી બીજં સ્તનયોર્મેઽવ્યાત્ સ્વાહા શક્તિશ્ચ દન્તયોઃ ।
સ કીલકં તથા ગુહ્યે વિનિયોગોઽવતાદ્વપુઃ ॥ ૭॥

ષડ્-દીર્ઘભાજા બીજેન વ્યાસોઽવ્યાન્મે કરાદિકમ્ ।
દ્વિપઞ્જપઞ્ચ નન્દેષુ દશભિર્મન્ત્રવર્ણકૈઃ ॥ ૮॥

ષડઙ્ગકલ્પના પાતુ ષડઙ્ગાનિ હ્યનુક્રમાત્ ।
ઐં વિદ્યાતત્ત્વં ક્લીં માયાતત્ત્વં સૌશ્ચ શિવાત્મકમ્ ॥ ૯॥

તત્ત્વત્રયં સં બીજં ચ મૂલં હૃત્કણ્ઠં મધ્યગઃ ।
સુધાબ્ધૌ હેમભૂરૂઢચમ્પકોદ્યાનમધ્યતઃ ॥ ૧૦॥

ગારુડોત્પલનિર્વ્યૂઢસ્વર્ણસિંહાસનોપરિ ।
સ્વર્ણપઙ્કજસંવિષ્ટાં ત્રિનેત્રાં શશિશેખરામ્ ॥ ૧૧॥

પીતાલઙ્કારવસનાં મલ્લીચન્દનશોભિતામ્ ।
સવ્યાભાં પઞ્ચશાખાયાં વજ્રજિહ્વાં ચ બિભ્રતીમ્ ॥ ૧૨॥

મુદ્ગરં નાગપાશં ચ દક્ષિણાભ્યાં મદાલસામ્ ।
ભક્તારિવિગ્રહોદ્યોગપ્રગલ્ભાં બગલામુખીમ્ ॥ ૧૩॥

ધ્યાયમાનસ્ય મે પાતુ શાસ્ત્રવોદ્વેષણે ભૃશમ્ ।
ભૂકલાદલદિક્પત્રષટ્કોણં ત્ર્યસ્રબૈન્દુકમ્ ॥ ૧૪॥

યન્ત્રં પૈતામ્બરં પાતુ સા માં પાયાદવિગ્રહા ।
આધારશક્તિમારભ્ય જ્ઞાનાત્માન્તાસ્તુ શક્તયઃ ॥ ૧૫॥

પીઠાદ્યાઃ પાન્તુ પીઠેઽત્રં પ્રથમં માં ચ રક્ષતુ ।
શાન્તિશઙ્ખવિશેષાત્મશક્તિભૂતાનિ પાન્તુ મામ્ ॥ ૧૬॥

આવાહનાદ્યાઃ પઞ્ચાપિ મુદ્રાશ્ચ સુમનોજલૈઃ ।
ત્રિકોણમધ્યમારભ્ય પૂજિતા બગલામુખી ॥ ૧૭॥

ક્રોધિની સ્તમ્ભિની ચાપિ ધારિણ્યશ્ચાપિ મધ્યગાઃ ।
ઓજઃ પૂષાદિપીઠાનિ કોણાગ્રેષુ સ્થિતાનિ વૈ ॥ ૧૮॥

ત્રિકોણ બાહ્યતઃ સિદ્ધનાથાદ્યા ગુરવસ્તથા ।
સિદ્ધનાથઃ સિદ્ધાનન્દનાથઃ સિદ્ધપરમેષ્ઠિ હિ ॥ ૧૯॥

નાથઃ સિદ્ધઃ શ્રીકણ્ઠશ્ચ નાથઃ સિદ્ધચતુષ્ટયમ્ ।
પાતુ મામથ ષટ્કોણે સુભગા ભગરૂપિણી ॥ ૨૦॥

ભગોદયા ચ ભગનિપાતિની ભગમાલિની ।
ભગવાહા ચ માં પાતુ ષટ્કોણાગ્રેષુ ચ ક્રમાત્ ॥ ૨૧॥

ત્વગાત્મા શોણિતાત્મા ચ માંસાત્મા મેદસાત્મકઃ ।
રૂપાત્મા પરમાત્મા ચ પાતુ માં સ્થિરવિગ્રહા ॥ ૨૨॥

અષ્ટપત્રેષુ મૂલેષુ બ્રાહ્મી માહેશ્વરી તથા ।
કૌમારી વૈષ્ણવી વારાહીન્દ્રાણી ચ તથા પુનઃ ॥ ૨૩॥

ચામુણ્ડા ચ મહાલક્ષ્મીસ્તત્ર મધ્યે પુનર્જયા ।
વિજયા ચ જયામ્બા ચ રાજિતા જૃમ્ભિણી તથા ॥ ૨૪॥

સ્તમ્ભિની મોહિની વશ્યાઽકર્ષિણ્યથ તદગ્રકે ।
અસિતાઙ્ગો રુરુશ્ચણ્ડઃ ક્રોધોન્મત્તકપાલિનઃ ।

ભીષણાશ્ચાપિ સંહાર એતે રક્ષન્તુ માં સદા ॥ ૨૫॥

તતઃ ષોડશપત્રેષુ મઙ્ગલા સ્તમ્ભિની તથા ।
જૃમ્ભિણી મોહિની વશ્યા જ્વાલા સિંહી બલાહકા ॥ ૨૬॥

ભૂધરા કલ્મષા ધાત્રી કન્યકા કાલકર્ષિણી ।
ભાન્તિકા મન્દગમના ભોગસ્થા ભાવકેતિ ચ ॥ ૨૭॥

પાતુ મામથ ભૂસદ્મ દશદિક્ષુ દિગીશ્વરાઃ ।
ઇન્દ્રોઽનલો યમો રક્ષો વરુણો મારુતઃ શશિઃ ॥ ૨૮॥

ઈશોઽનન્તઃ સ્વયમ્ભૂશ્ચ દશૈતે પાન્તુ મે વપુઃ ।
વજ્રશક્તિર્દણ્ડખડ્ગૌ પાશાઙ્કુશગદાઃ ક્રમાત્ ।
શૂલં ચક્રં સરોજં ચ તત્તચ્છસ્ત્રાણિ પાન્તુ મામ્ ॥ ૨૯॥

અથ ચ પૂર્વાદિ ચતુર્દિશાસુ પરતઃ ક્રમાત્ ।
પાતુ વિઘ્નેશબટુકૌ યોગિની ક્ષેત્રપાલકઃ ॥ ૩૦॥

ગુરુત્રયં ત્રિરેખાસુ પાતુ મે વપુરઞ્જસા ।
પુનઃ પીતામ્બરા પાતુ ઉપચારૈઃ પ્રપૂજિતા ॥ ૩૧॥

સાઙ્ગાવરણશક્તિશ્ચ જયશ્રીઃ પાતુ સર્વદા ।
વલયં બટુકાદિભ્યો રક્ષાં કુર્વન્તુ મે સદા ॥ ૩૨॥

શક્તયઃ સાધકા વીરાઃ પાતુ મે દેવતા ઇમાઃ ।
ઇત્યર્ચાક્રમતઃ પ્રોક્તં સ્તોત્રં પૈતામ્બરં પરમ્ ॥ ૩૩॥

યઃ પઠેત્ સકૃદપ્યેતત્ સોઽર્ચાફલમવાપ્નુયાત્ ।
સર્વથા કારયેત્ ક્ષિપ્રં પ્રપદ્યન્તે ગદાતુરાન્ ॥ ૩૪॥

રાજાનો રાજપત્ન્યશ્ચ પૌરજાનપદાસ્તથા ।
વશગાસ્તસ્ય જાયન્તે સતતં સેવકા ઇવ ॥ ૩૫॥

ગુરુકલ્પાશ્ચ વિબુધા મૂકતાં યાન્તિ તેઽગ્રતઃ ।
સ્થિરા ભવતિ તદ્ગેહે ચપલાપિ હરિપ્રિયા ॥ ૩૬॥

પીતામ્બરાઙ્ગવસનો યદિ લક્ષસઙ્ખ્યં
    પૈતામ્બરં મનુમમું પ્રજપેન્નરો યઃ ।
હેમી સકૃન્નિયમવાન્ વિધિના હરિદ્રા-
    માલાં દધદ્ભવતિ તદ્વશગા ત્રિલોકી ॥ ૩૭॥

ભવાનિ બગલામુખિ ત્રિદશકલ્પવલ્લિ પ્રભો
   કૃપાજલનિધે તવ ચરણધૂતબાધાખિલઃ ।
સુરાસુરનરાદિકસકલભક્તભાગ્યપ્રદે
   ત્વદઙ્ઘ્રિસરસીરુહદ્વયમહં તુ ધ્યાયે સદા ॥ ૩૮॥

ત્વમસ્ય જગતાં જનિસ્થિતિવિનાશબીજં નિજ
   પ્રકાશબહુલદ્યુતિર્ભવતિ ભક્તહૃન્મધ્યગા ।
ત્રયીમનુ સુપૂજિતા હરિહરાદિ વૃન્દારકૈ-
   રનુક્ષણમનુક્ષણં મયિ શિવે ક્ષણં વીક્ષ્યતામ્ ॥ ૩૯॥

શિવે તવ તનૂમહં હરિહરાદ્યગમ્યાં પરાં
   નિખિલતાપપ્રત્યૂહહૃદયાભાવયુક્તાં સ્મરે ।
વિદારય વિચૂર્ણય ગ્લપય શોષય સ્તમ્ભય
   પ્રણોદય વિરોધય પ્રવિલય પ્રબદ્ધારિણામ્ ॥ ૪૦॥

પાર્વતિ કૃપાલસન્મયિ કટાક્ષપાતં મના-
   ગનાકુલતયા ક્ષણં ક્ષિપ વિપક્ષસંક્ષોભિણિ ।
યદીક્ષણપથં ગતઃ સકૃદપિ પ્રભુઃ કશ્ચન
   સ્ફુટં મમ વશંવદો ભવતુ તેન પીતામ્બરે ॥ ૪૧॥

ૐ નમો ભગવતે મહારુદ્રાય હું ફટ્ સ્વાહા ।

ઇતિ અથર્વણરહસ્યાન્તર્ગતઃ શ્રીબગલામુખીસ્તવરાજઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*Shri Bagalamukhi Stavarajah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*